# Shri Radhaya Dhyatam Ganesha Stotram

# श्रीराधया ध्यातं गणेशस्तोत्रम्

## Document Information

Text title : Shri Radhaya Dhyatam Ganesha Stotram

File name : rAdhayAdhyAtaMgaNeshastotram.itx

Category : ganesha, brahmavaivartapurANa, stotra, aShTaka

Location : doc_ganesha

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | uttarabhAga | adhyAya 123/25-28||

Latest update : March 29, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2025

*sanskritdocuments.org*

# श्रीराधया ध्यातं गणेशस्तोत्रम्

श्रीकृष्णप्रीतिकामाऽथ सुसङ्कल्पं विधाय च ।
गङ्गोदकेन हेरम्बं स्नापयामास भक्तितः ॥ २२॥

ध्यानं च सामवेदोक्तं चकार शुक्लपुष्पतः ।
माता चतुर्णां वेदानां वसोश्च जगतामपि ॥ २३॥

बुद्धिरूपा भगवती ज्ञानिनां जननी परा ।
ध्यानात्मकं स्वपुत्रं तं परं ध्यानं चकार सा ॥ २४॥

शर्वं लम्बोदरं स्थूलं ज्वलन्तं ब्रह्मतेजसा ।
गजवक्त्रं वह्निवर्णमेकदन्तमनन्तकम् ॥ २५॥

सिद्धानां योगिनामेव ज्ञानिनां च गुरोर्गुरुम् ।
ध्यातं मुनीन्द्रैर्देवेन्द्रैर्ब्रह्मेशशेषसंज्ञकैः ॥ २६॥

सिद्धेन्द्रैर्मुनिभिः सद्भिर्भगवन्तं सनातनम् ।
ब्रह्मस्वरूपं परमं मङ्गलं मङ्गलालयम् ॥ २७॥

सर्वविघ्नहरं शान्तं दातारं सर्वसम्पदाम् ।
भवाब्धिमायापोतेन कर्णधारं च कर्मिणाम् ॥ २८॥

शरणागतदीनार्तपरित्राणपरायणम् ।
ध्यायेद्ध्यानात्मकं साध्यं भक्तेशं भक्तवत्सलम् ॥ २९॥

इति ब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे उत्तरार्धे त्र्ययोविंशत्यधिकशततमाध्यायान्तर्गतं राधया ध्यातं गणेशस्तोत्रम् सम्पूर्णम् ।

ब्रह्मवैवर्तपुराण । उत्तरभाग । अध्याय १२३/२५-२८॥

brahmavaivartapurANa . uttarabhAga . adhyAya 123/25-28..

Proofread by PSA Easwaran

*Shri Radhaya Dhyatam Ganesha Stotram*
pdf was typeset on April 5, 2025

Please send corrections to *sanskrit@cheerful.com*